Topic 42

अदादिगणीय शीङ् स्वप्ने एवं अधि + इङ् अध्ययने ।

शीङ् स्वप्ने ।

शीङः सार्वधातुके गुणः ।

'क्ङिति च' इत्यस्यापवादः । शेते, शयाते ।

शीङो रुट् ।

शीङः परस्य झादेशस्यातो रुडागमः स्यात् । शेरते । शेषे । शयाथे । शेध्वे । शये । शेवहे । शेमहे । शिश्ये । शिश्याते । शिश्यिरे । शयिता । शयिष्यते । शेताम् । शयाताम् । शेरताम् । अशेत । अशयाताम् । अशेरत । शयीत । शयीयाताम् । शयीरन् । शयिषीष्ट । अशयिष्ट । अशयिष्यत ।

इङ् अध्ययने । इङिकावध्युपसर्गतो न व्यभिचरतः । अधीते । अधीयाते । अधीयते ।

'शीङ्' धातु के बाद जो 'झ' के स्थान पर 'अत्' आदेश होता है, उसको 'रुट्' हो जाता है। 'रुट्' में टकार इत्संज्ञक है, और उकार उच्चारणार्थ। अतः टित् होने के कारण 'आद्यन्तौ टकितौ' परिभाषा से यह 'अत्' का आद्यवयव बनता है। उदाहरण के लिए 'शीङ्' धातु से लट् लकार में प्रथम पुरुष बहुवचन की विवक्षा में 'झि' प्रत्यय, शप्-लुक् और गुण आदि होकर 'शे अते' रूप बनता है। इस अवस्था में 'अते' के आदि में रकार होकर 'शे र् अते' = 'शेरते' रूप सिद्ध होता है।

'गाङ् लिटि'

इणो गाङ् स्याल्लिटि । अधिजगे, अधिजगाते, अधिजगिरे । अध्येता । अध्येष्यते । अधीताम् अधीयाताम् । अधीयताम् । अधीष्व । अधीयाथाम्

अधीध्वम् । अध्ययै, अध्ययावहै, अध्ययामहै ।
अध्यैत, अध्यैयाताम्, अध्यैयत । अध्यैथाः,
~~अध्यैथाथाम~~ अध्यैयाथाम्, अध्यैध्वम् । अध्यैयि,
अध्यैवहि, अध्यैमहि । अधीयीत । अधीयीयाताम् ।
अधीयीरन् । अध्येषीष्ट ।

विभाषा लुङ्लृङोः
इङो गाङ् वा स्यात् ।

गाङ्कुटादिभ्योऽञ्णिन्ङित् ।

गाङादेशात् कुटादिभ्यश्च परेऽञ्णितः प्रत्यया ङितः स्युः

घु-मा-स्था-गा-पा-जहाति-सां हलि ।
एषामात ईत् स्याद्धलादौ क्ङित्यार्धधातुके ।
अध्यगीष्ट । अध्यैष्ट । अध्यगीष्यत, अध्यैष्यत ।